कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

E

दाखल क्र. M.2497 विषय

नाव हनुमत संहिता (शिवप्रतिष्ठा)

लेखक / लिपीकार

पृठ 38 काळ [✓ पूर्ण] / अपूर्ण

॥ श्री ॥

अथ शिवप्रतिष्ठानुक्रम लिख्यते. ॥

१ अधिकार प्रायश्चित्त.
२ मुख्य संकल्प
३ पुण्याहवाचन मातृकापूजन, नांदीश्राद्ध.
४ ~~आचार्यादिकांच्या~~
आचार्यादीनां वरणं पूजनंच ॥
५ वारुणी दीक्षाचार:
६ आचार्य-कर्मसर्षप विकिरणादि.
७ जलादिवास: ॥
८ जलयात्रा.
९ वास्तुपूजनं
१० सर्वतोभद्रदेवता स्थापनं पूजनंच.
११ अग्निस्थापनं
१२ ग्रहस्थापनंच. कुंडपूजनं वस्त्रादि:
१३ अन्वाधानं.
१४ आज्यभागानंतरं हवनं
१५ देवतास्नानविधि: ॥
१६ पर्याय होम:
१७ प्रधान होम.
१८ प्राणप्रतिष्ठा. पूजनादि विधि: ॥
१९ तिलौदन होम:
२० स्विष्टकृदादि होम: बलिदानं पूर्णाहुति:
२१ उर्व समाप्ति: ॥

।श्री हनुमत्साहिता।शिवप्रतिष्ठा

॥ श्रीगणेशायनमः॥ अथशिवपंचायतनप्रतिष्ठालिख्यते॥

शि·प्र· ॥ महोमहेत्समाराध्य जलोत्सर्गमथोक्तवान्॥ प्रतिष्ठांसर्वदेवानां

॥१॥ नीलकंठोवदत्यसो॥१॥ तत्रतत्कालो विष्णुधर्मोत्तरे॥ चैत्रेवा
फाल्गुनेवापि ज्येष्ठेवामाधवेतथा॥ माघेवासर्वदेवानांप्रतिष्ठा
शुभदासिते॥२॥ रिक्तान्यतिथिषुस्यात्सावारेभौमान्यकेदिने॥ तत्रैव॥
आषाढेद्वेतथामूलमुत्तरात्रयमेवच॥ ज्येष्ठाश्रवणरोहिण्योपूर्वाभा-
द्रपदातथा॥३ हस्ताश्विनीरेवतीचपुष्योमृगशिरस्तथा॥ अनुराधा ॥१॥

तथा स्वातीप्रतिष्ठासु प्रशस्यते ॥ ४ ॥ नारसिंहे ॥ तथा मघोश्विनो मासउत्तमः सर्वकामदः ॥ देवी तत्र सदा शाक्र पांसुनापि प्रतिष्ठिता ॥ १ ॥ लभते फलदा पुंसां कर्कस्थे च वृषस्थिते ॥ नातिथिन्न च नक्षत्रं नोपवासोत्र कारणं ॥ २ ॥ मातृ भैरव वाराह नारसिंह त्रिविक्रमाः ॥ महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने ॥ ३ ॥ क्व चिन्निषेधः ॥ आर्द्रादिके स्वाति विराम काले नक्षत्रवृंदे दशके स्थिते र्के ॥ विवाहचौलव्रतबंधदीक्षासुरस्मातिष्ठादिन कार्यमेवेति ॥ अथ संभाराः ॥ अर्कादिग्रह समिधा ॥ प्रत्येकमष्टशतं

संक्षेपपक्षे॥ आचम्य पवित्रपाणिः प्राणानायम्य॥ देशकालौ संकीर्त्य॥
ममेह जन्मनि कायिकादिसकलदुरितक्षयार्थं करिष्यमाणसपरिवार
शिवहनुमन्मूर्तिप्रतिष्ठाकर्मण्यधिकारसिध्यर्थमेकप्राजापत्यप्रायश्चित्तप्रत्याम्नायत्वेन विहितायाः गोः निष्क्रयीभूतं यथाशक्ति द्रव्यं
यथानाम गोत्राय ब्राम्हणाय दातुमहमुत्सृज्ये॥ तेन श्रीपापापहा महा
विष्णुः प्रीयतां॥ पुनराचम्य॥ देशकालौ स्मृत्वा॥ मम भ्रूणहत्यामहापापो ॥२॥
पपातकादिसकलपापक्षयकोटिगुणसर्वयज्ञतपोदानतीर्थवेदपुरा-

णादिपुण्यफलप्राप्तिपूर्वकमेकविंशतिसंख्याकमातृपितृपत्नीकुलत्रयनरकोत्तारणपूर्वकानेककल्पव्यापिस्वर्गलोकहर्षपरार्धद्वयकालमहस्तपःप्रभृतिलोकांगनासहितभोगपूर्वकोत्तरवर्षकोटिसहस्रावच्छिन्नरुद्रलोकमहत्वादुत्तरकालिकमहापार्थिवजन्मशूरत्वबहुभृत्यत्वब्राम्हण्यविपुलभोगपूर्वकं प्रत्योत्तरकालिकयोगादुत्तरतो मोक्षप्राप्तिकामः अस्मिन् सहपरिचारशिवमूर्तौ हनुमन्मूर्तौ च देवकलासानिध्यार्थं श्रीपरमेश्वरप्रीत्यर्थं च सपरिवारशिवप्रातिष्ठां हनुमत्प्रातिष्ठां च

शि० प्र०
॥२॥

तंत्रेण करिष्ये॥ तदंगभूतं स्वस्ति पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादि ऋत्विग्वरणं च करिष्ये॥ तत्रादौ निविघ्नतासिध्यर्थं महागणपतिपूजनं करिष्ये॥ आचार्यप्रार्थना॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः॥ तथा त्वं मम यज्ञोऽस्मिन्नाचार्यो भव सुव्रत॥१॥ यथा चतुर्मुखो ब्रम्हा सर्वदेवनमस्कृतः॥ तथा त्वं मम यज्ञेऽस्मिन् ब्रम्हा भव द्विजोत्तम॥२॥ भगवन्सर्वधर्मज्ञ सर्वधर्मभृतां वर॥ वितते मम यज्ञेऽस्मिन्सदस्यो भव सुव्रत॥३॥ ॥३॥ कर्मणामुपदेष्टारं सर्वकर्मविदुत्तमं॥ कर्मिणं वेदत-

त्वद्वं यज्ञेऽस्मिं त्वामहं वृणे ॥ ४ ॥ प्रारिसितस्य यज्ञस्य जपस्य हवनस्यंच

॥ निर्विघ्नेन समाप्त्यर्थं गणेशं त्वामहं वृणे ॥ ५ ॥ अस्य यागस्य।निष्पत्तोभवं

तोभ्य।र्चिता त्वया ॥ सावधानाः प्रकुर्वंतु स्वं स्वं कर्म यथोदितं ॥ ६ ॥

ॐ यमृ॒त्विजो॑ बहु॒धा कु॒ल्पयं॑त॒ः सचे॑तसो य॒ज्ञमि॒मं वहं॑ति ॥ यो अ॑नूचा॒

नो ब्रा॒म्हणो॒ यु॒क्त आ॑सी॒त्का स्वि॒त्तत्र॒ यज॑मानस्य सं॒वित् ॥ ततो दंपत्यो

र्वारुणी दीक्षा ॥ दंपत्योरुत्तरिद्धयांते सफलाक्षतग्रंथिबंधः ॥ देवस्यत्वे

त्या।दिमंत्रैस्तयोरभिषेकः ॥ य॒दाब॑ध्नंदाक्षाय॒णा हि॑रण्यं॒ श॒तानी॑काय

सुमनु॒स्यमा॑ना॥ तन्न॒ आब॑ध्नामि श॒तशा॑रदा॒यायु॑ष्मान् ज॒रद॑ष्टि॒र्यथा
संतू॥ इतिमंत्रेण यजमानकरेकुंकुमाक्तसूत्रबंधनं॥ स्वस्तिनइति
तिलककरणं॥ दधिक्राव्णइतिदधिवंदनं॥ कांडात्कांडादितिदूर्वा
भिर्मार्जनं॥ अक्षंनमीमदंतेतिअक्षतवंदनं॥ ततः आचार्योअक्षतान्
गृहीत्वा॥ करोतुस्वस्तितेब्रम्हास्वस्तिचापिद्विजातयः॥ सरीसृपाश्चये
श्रेष्ठास्तेभ्यस्तेस्वस्तिसर्वदा॥ ययातिर्नहुषश्चैवधुंधुमारोभगीरथः॥ ॥६॥
तुभ्यंराजर्षयः सर्वेस्वास्तिकुर्वंतुनित्यशः॥ स्वस्तितेस्तुद्विपादेभ्यश्च

तुपादेभ्य एवच ॥ स्वस्त्यस्त्वपादकेभ्यश्च नित्यं तव महामखे ॥ इति
पठित्वा ॥ यजमान हस्ते अक्षतान् दत्वा वदेत् ॥ ॐ व्रतेनस्थो ध्रुव
क्षेमा धर्मणा यातु यज्ञना ॥ नि बर्हिषि सदतं सोमपीतये ॥ त्वंदी-
क्षितोसि नियमेन स्थातव्यं ॥ ततः आचार्यैः भूतोत्सारणादि कुर्यात्
॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं
यत्रस्थं तत्र गच्छतु ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं ॥
सर्वेषामविरोधेन यज्ञकर्म समारभे ॥ पंचगव्यं संपाद्य ॥ शुचीवो हव्येत्या

दिमंत्रैः पंचगव्येन यज्ञभूमिंप्रोक्ष्य आपोहिष्ठेति शुध्दोदकेन ।। स्वस्त्ययनं तार्क्ष्यं० इति लाजान् अक्षतान् वा विकिरेत् ।। देवाः आयांतु यातुधाना अपयांतु विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कुर्यात् ।। ततः मधुपर्कः ।। देशकालौ संकीर्त्य आसीन् अमुक देवताप्रतिष्ठाकर्मणि वृतायास्मै आचार्याय मधुपर्कं करिष्ये ।। वृतो अमू ब्राम्हणो मधुपर्केणार्हयिष्ये ।। २ ।। वृतान् अमून् ब्राम्हणान् मधुपर्केणार्हयिष्ये ।। ३ ।। ततः जलाधिवासनं ।। आचार्ये मूर्तिं धरैय यजमान ऋत्विक् सुवा-

सिनीसुहृत्वर्गयुतः अश्वादियानैः सहपूजाद्रव्याणिगृहीत्वागीतवाद्यमंगलघोषयुता। सिनीहस्तास्थितकलशानग्रतः कृत्वामूर्तिसहितः जलाशयंगच्छेत्॥ ततः आचार्यःतत्र वेदिंकृत्वातदुपरिदेवं स्थाप्य॥ स्योनापृथ्वीत्यष्टमृद्भिः शोधयित्वा॥ पंचगव्यमंत्रान्पठन् शोध्य॥ जलांतिके तोरणपुष्पमालादिभिः शोभितंकुर्यात्॥ ततः पीठोपरिपद्मंकृत्वा॥ तदुपरिदेवंस्थाप्यतत्पीठंजलाशयेस्थापयेत्॥ अथपीठस्याधोभागे आधारशक्तयेनमइतिसंपूज्यप्रार्थयेत्॥ यदाधारेजगत्सर्वं

सप्तावरूणसंयुतं॥ लोकालोकसमाकीर्णं सप्तार्णवजलोद्भवं॥१॥ सर्वबीजसमायुक्तं प्राणशक्तिसमन्वितं॥ सात्वं धत्स्व महापीठं यत्र संस्थाप्यते हरः॥२॥ इति प्रार्थ्य॥ आधारशक्तयेनमइति बलिं दद्यात्॥ अथ पीठस्य परितः प्रागादिदिक्षु अष्टदिग्गजान् आवाह्य पूजयेत्॥ ऐरावतायनमः॥१॥ पुंडरीकायनमः॥२॥ वामनायनमः॥३॥ कुमदायनमः॥४॥ अंजनायनमः॥५॥ पुष्पदंतायनमः॥६॥ सार्वभौमायनमः॥७॥ सुप्रतीकायनमः॥८॥ पीठमध्ये वीरभद्रादिद्वारपालान्॥ वीरभद्रायनमः॥१॥ नंदिनेनमः॥२॥

महाकाळायनमः॥३॥गणेंशायनमः॥४॥वृषभायनमः॥५॥भृंगिणेनमः॥६॥
स्कंदायेनमः॥७॥उंमायेनमः॥८॥चंडीश्वरायनमः॥९॥इतिसंपूज्य बलिंदद्यात्
॥ततोयजमानःआचम्यप्राणानायम्य देशकालौसंकीर्त्य॥ अस्याःसपरि
वारशिवमूर्तेःहनुमन्मूर्तेश्च गर्भाधानादिसंस्कारत्रयमप्सुकरिष्ये॥पुष्पा
क्षतान्गृहीत्वा॥ या आपो मातृभूतावै जगदुत्पत्तिपोषणैः॥तत्कृतोग
र्भसंस्कारोमूर्तौसमुपतिष्ठतां॥ॐ उदी॒र्ष्वात॒ःपतिवती॒ह्ये॒षा॥विश्वाव॒सुं
नमसा गी॒र्भिरीळे॥ अ॒न्यामिच्छपितृ॒षदं॒व्यक्तां॒सतेभा॒गोज॒नुषा॒तस्य

विध्दि॥ इति गर्भाध्यानं॥ पुष्पाक्षतानप्सु क्षिपेत्॥ पुनर्गृहीत्वा॥

शो० प्र० ॐ ओषध्धीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः॥ अश्वा इव सजित्वरी

॥७॥ वीरुधः पारयिष्णवः॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरे

क आसीत्॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

अभ्यः संभृतः पृथिवीरसाच्च॥ विश्वकर्मणः समवर्तताधि॥ तस्य त्वष्टा वि ॥७॥

दधद्रूपमेति॥ तत्पुरुषस्य विश्वमाजानमग्रे॥ यासां गर्भे हि संजाता विरि

ञ्च्या धामहाधिपाः॥ महापुंसवनाख्यस्मात्क्रियापुंसवनान्विताः॥ एते न पुंसवना

ख्येन कर्मणा संस्करोमि ॥ पुष्पादि जले क्षिपेत् ॥ पुनरादाय ॥ यत्तेसुशी
मे हृदये हितमंतः प्रजापतौ ॥ मन्येहं मां तद्विद्वांसं माहं पौत्रमघं नियां ॥
अनेनानवलोभकर्मणा संस्करोमि ॥ पुष्पादि जले क्षिपेत् ॥ एतत्कर्मणां
हवनप्रत्याम्नायेन ब्राम्हणाय किंचित् धान्यं दातुं जलमुत्सृजेत् ॥
ततः औदुंबरः स्तबक कुश तरुणे स्त्रेण्याशलत्या जले त्रिरेखां कुर्यात्
समस्त व्याहृति मंत्रेण सोमो नो राजावतु मानुषीः प्रजा निविष्टचक्रा
सौ ॥ अथ प्रार्थना ॥ विष्णोस्तु या बीजवहा वहारण्या । शीमंतिनीगर्भ

भरेण युक्ता॥ सेयं भवभ्यो विदधातु कामान् सीमंतसंस्कारितनीरकेशां
॥ आस्मिन् सदाशिवक्षेत्रे शिलाभूते विधानतः॥ कृतः सीमंतसंस्कारस्ते
न तुष्यतु मे हरः॥ अप्सुमे० ऋक्॥ समुद्रज्येष्ठा०॥ ४॥ ऋचा॥ सर्वेषामेव
बीजानां कारणानि जलानि तु॥ जीवनं सर्वजंतूनां तेषु संस्थाप्यते ह
रः॥ ततो देवप्रार्थना॥ निषिध्दादिक् समानीतं कुत्सिताकरसंभवं॥ लक्ष
णादिविनिर्मुक्तं विधिहीनं समाहृतं॥ सर्वसिध्दिप्रदं शुभ्रं दिव्यं भव्यं च
सर्वदा॥ त्वदधिष्ठानसंयोग्यं त्वत्प्रसादात्सुरेश्वर॥ पुरुषसूक्तादिजपन्

पूजां कुर्यात्॥ एवं अधिवासनं कृत्वा॥ जलयात्रां कुर्यात्॥ आचम्य
शिवप्रतिष्ठांगभूतं जलयात्रां करिष्ये॥ तीरं प्रक्षाल्य गोमयेनन्चतुरस्रमुप
लिप्य यवैस्तंडुलैर्वा स्वस्तिकं अष्टपद्मं वा कृत्वा॥ बाळ्हित्था पर्वतानां खिद्रं
बिभर्षि पृथिवी॥ प्र या भूमिं प्रवर्तति मुन्हा जिनोषि महिनी॥ भूमिं ध्यात्वा॥
मंडलस्य प्रागादि दिक्षु मध्ये च तंदुलपुंजान् कृत्वा॥ चतुर्दिक्षु चतुरः
मध्ये एकमेवं पंचकलशान् स्थापयेत्॥ मूले ब्रम्हाणं मध्ये विष्णुं कंठे रुद्रं
चावाहयेत्॥ इमं मे गंगेति जलेनापूर्य गंधादिना पूजयेत्॥ तत्र वरुणं संपू

ज्य॥ प्रार्थयेत्॥ एह्येहियादोगणवारिधीनांगणेनदेवेशसहाप्सरोभिः॥
विद्याधरेंद्रामरगीयमानपाहित्वमस्मान्भवनमस्ते॥ १॥ ततः कलशा
दाग्नेयांस्वस्तिकादौ कृतसप्ताक्षतपुंजेषु मातृकास्थापनं॥ ॐ मत्स्येनमः
ॐ कूर्म्यैनमः॥ २॥ वाराह्येनमः॥ ३॥ ॐ दर्दुर्यैनमः॥ ४॥ ॐ मकर्यैनमः॥ ५॥
ॐ भहुक्येनमः॥ ६॥ ॐ तंतुक्येनमः॥ ७॥ तत्पुरतः पुंजेषु॥ कुमार्यैनमः॥ १
धनदायेनमः॥ २॥ नंदायेनमः ३ विमलायेनमः ४ मंगलायेनमः ५
बलायेनमः॥ ६ पद्मायेनमः ७॥ तत्पुरतः पुंजेषु॥ कूर्म्यैन० १ लक्ष्म्यै० २

महामायै० ३ पानदेव्यै० ४ वारुण्यैन० ५ निर्मलायै० ६ गोधायै०॥ ७॥
ततोमंडलात् बहिः अष्टदिक्षु दिक्पालान् आवाह्य पूजयेत्॥ ततस्थापित
देवतानांजलेप्रक्षेपः जले द्वादशघृताहुतीदद्यात्॥ अभ्द्यस्वाहा॥ अभ्द्यइदं०॥ १॥
वार्भ्यं० २ वार्भ्यइदं०॥ उदकायस्वा०॥ उदकायइ०॥ ३॥ तिष्ठंतीभ्यः स्वा०॥ तिष्ठंतीभ्यइ०
४॥ स्रवंतीभ्य० स्रवंतीभ्यइ० ५॥ स्यंदमानाभ्यः स्वा० स्यंदमानाभ्यइ०॥ ६॥ कूपाभ्य०
कूपाभ्यइ०॥ ७॥ सद्याभ्यस्वा० सद्याभ्यइ०॥ ८॥ धार्यभ्य० धार्यभ्यइ०॥ ९॥ अर्णवाय०
अर्णवायइ०॥ १०॥ समुद्राय० समुद्रायइ०॥ ११॥ सरिराय० सरिरायइ०॥ १२॥

ततो वरुणप्रार्थना॥ प्रतीचीश नमस्तेस्तु सर्वाघविनिषूदन॥ पवित्रं कु
शि० प्र० रु मे देव सर्वकार्येषु सर्वदा॥१॥ अथ देवप्रबोधनं॥ ॐ नमो भगवते सदा
॥१०॥ शिवाय सकलतत्त्वात्मकाय सकलतत्त्वविदूराय सकललोकैककर्त्रे सकललो
कैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सक-
लनिगमगुह्याय सकलवरप्रदाय सकललोकैकशंकराय शशांकशेखरा
य शाश्वतनिजाभासाय निराभासाय निरुपमाय निराधाराय निर्लेपाय नि ॥१०॥
ता
र्द्वंद्वाय निरूपमविभवाय नित्यशुध्दपरिपूर्णसच्चिदानंदाद्वयाय परमशांत

प्रकाशत्तेजोरूपायजयजयमहारुद्रमहारौद्रभद्रावतारमहाभैरवकालभैरव
कल्पांतभैरवकपालमालाधरखट्वांगखड्गचर्मपाशांकुशडमरूशूलचापबाण
गदाशक्तिभिंदिपालतोमरमुसलमुद्गरभुसुंडिप्रासपरिघशतघ्नीशतचंद्रचंडा
युधभीषणकरसहस्त्रमुखदंष्ट्राकरालविकटाट्टहासविस्फारितब्रम्हांडमंडल
नागेंद्रकुंडलनागेंद्रहारनागेंद्रवलयनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरां
तकविश्वेश्वरविरूपाक्षवृषभवाहनविषभूषणविश्वतोमुखसर्वतोरक्षरक्षमां
नमस्तेनमस्ते॥ इतिस्तुत्वा॥ जलाद्बहिर्देवआनीयमाने कद्रुद्राय० ऋक्

त्र्यंबकं० त्रे० कृ पठित्वा ततः तीरे पीठादौ स्वस्तिकं कृत्वा तत्र देवं स्थाप
शि० प्र० यित्वा जलाज्ञातमिति भावयेत्॥ ततो यजमान आचम्य अस्याः सप
॥१३॥ रिवार शिवमूर्तेः जातकर्म करिष्ये॥ यथा वातः पुष्करिणीं समींग
यति सर्वतः॥ एवा ते गर्भ एजतु निरैतु दशमास्यः॥ इति कुशोदकेन देव
स्योत्पत्तिस्थानं संप्रोक्ष्य॥ अप ज्योतिषा तमो अंतरिक्षादुद्रः शीपालमि
व वात आजत्॥ बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आचक्र आ ॥१३॥
गाः॥ इत्यनेन शैवालमलादि क्षालनं॥ ततो विषममानेन मधुसर्पिषी

मिश्रीकृत्या शिलातले निक्षिप्य सुवर्णेनाव घृष्य स्वर्णाधिभाजने निधा
यत्तत्पात्रं वामहस्ते धृत्वा दक्षिणहस्ते न स्वर्णशलाकया तन्मधु देवस्य
मुखे दद्यात्॥ प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतिं मघोनां॥
आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन्॥ तद्धि
रण्यं प्रक्षाल्य॥ देवस्य दक्षिणवामकर्णयोर्निधाय॥ मेधां ते देवः स
विता मेधां देवी सरस्वती॥ मेधां मे अश्विनो देवावाधत्तां पुष्करस्र
जौ॥ इति देवस्य अंसावभिमृशेत्॥ अश्माभव परशुर्भवा हिरण्यमस्तृतं

शि० प्र०
॥१२॥

भंव ॥ वेदोवैपुत्रनामासि सजीव शरदः शतं ॥ ततो देवस्य मुखे जलदद्यात् ॥
इमांकुमारो जरांधयतु दीर्घमायुः प्रजीवसे ॥ अस्येस्तनोश्रेयुंजानाआ
युर्वर्चोयशोबलं ॥ प्रभृतंघृतमादाय सर्वांगेषु देवमुद्वर्त्तयेत् ॥
सुगंधद्रव्यैर्देवमुद्वर्त्य कनिक्रदज्जनुषं ॥ ततोवस्त्रेण जलंपरिमा
र्ज्यपंचोपचारैः संपूज्य दीपैर्नीराजयेत् ॥ ततोबहिर्जलचरेभ्यो
बलिंदद्यात् ॥ गण्हंतु पार्षदाः सर्वे शिवस्यानुचराः सदा ॥ मातरः प्रम ॥१२॥
थाद्याश्च बालिमोदनमुत्तमं ॥३॥ देवंप्रार्थयेत् ॥ हिरण्मयांउंप्रबभुव

यस्मात्सएक आसीद्भुवनाधिपत्ये ॥ भूमिं तथाद्यांच दधार तस्मै दे
वाय हविषा विधेम ॥१॥ स्वागतं देवदेवेश विश्वरूप नमोस्तु ते ॥ सर्वं
चत्वमधिष्ठानं शुध्दं कुर्म सहस्वतत् ॥ इति प्रार्थ्य ॥ उत्तिष्ठेति देवमुत्था
प्य गीतवाधादि सुवासिनीहस्तस्थकलशमग्रतः कृत्वा ॥ तत्र मंत्रः ॥
रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ॥ अभीशू
नां महिमानं पनायत मनः पश्चादनु यच्छंति रश्मयः ॥ रथादिवाहनेन
कूर्मशिला ब्रम्हशिला सहितं देवं नयेत् ॥ मध्यमार्गे बालिः ॥ अर्धमार्गे

स्वल्पां भूमिं निखनेत्॥ तत्र इंद्रादि लोकपालेभ्यो नम इति गंधादि
भिः संपूज्य॥ तत्र क्षेत्रपालं पूजयेत्॥ आवाहयामि देवेशं भैरवं क्षे
त्रपालिनं॥ दिव्यदीप्तिं महाकायं नानाभरणभूषितं॥ तत्र मंत्रः॥
क्षेत्रस्य पतिनावयं हितेनैव जयामसि॥ गामश्वं पोषयित्न्वा स नो मृ
ळाती दृशे॥ ॐ भूर्भुवः स्वः क्षेत्रपाल इहागच्छ इह तिष्ठ क्षेत्रपालेभ्यो ॥१२॥
नम इति गंधपुष्पाक्षतयुतं माषभक्तकुंकुमाक्तं बालिं हस्ते ग्रहीत्वा प्रार्थयेत्
॥ ॐ नमो भगवते क्षेत्रपाल भासुरात्रिनेत्र ज्वालामुख चतुःषष्ठि रूपाय

नगरग्रामक्षेत्रवनव्यापिनेसकलजगत्पूजिताय ॐ ह्रां ह्रीं ह्रूं क्षेत्र
पाल बलिं गृण्ह गृण्ह भैरवरूपं कुरु २ क्रूं त्रूं फां फां डमरु डमरु कुरु कुरु
यमदंड हस्ताच्छिंधि २ भिंधि २ कुरु २ मुरु २ चल २ ह्रूं ३ रूपादि कालि २
किलितं पातु नः बलिं गृहाण हिंकाराय स्वाहा ॥ भो क्षेत्रपाल बलिं गृहाण
विघ्नं निवारय २ स्वाहा ॥ इति बलिं दत्वा ॥ पुष्पांजलिं क्षिपेत् नममेतत् ॥
ततो हस्तौ पादौ प्रक्षाल्याचम्य ॥ ब्राम्हणैः सुहृद्भिः सह मंडपप्रदक्षिणीकृ
त्य स्नानमंडपे देवं स्थापयित्वा ॥ गंधादिभिः संपूज्य ॥ इति जलयात्रा ॥

ततः वास्तुपूजनं॥ तत्रमंडपवेद्यां सर्वतोभद्रं लिंगतोभद्रं वाविलिख्यतत्र
मंडलदेवता आवाह्यपूजयेत्॥ ततः अग्निप्रतिष्ठांकृत्वाग्रहान् संपूज्यान्वाधा
नंकुर्यात्॥ करिष्यमाणसपरिवारशिवहनुमत्प्रतिष्ठाकर्मणि होमंकर्तुंअ
न्वाधानंकरिष्ये॥ समिद्द्वयंत्रयंवादाय। अस्मिन्नित्यादिचक्षुषी आज्ये
नेत्यंतमुक्त्वात्रप्रधानं॥ आदित्यादिनवग्रहान् अर्कादिसमित्तिलचर्वाज्य ॥१५॥
द्रव्यैः प्रतिद्रव्यंप्रत्येकं यथासंख्याकाभिराहुतिभिः ग्रहाधिदैवतप्रत्यधि
दैवतानितैरेवद्रव्यैः प्रतिद्रव्यंप्रत्येकं ग्रहापेक्षयान्यूनसंख्याकाभिः॥

विनायकादिकर्मसाद्गुण्यदेवताः ते० कं ततोपिन्यूनसंख्याभिः॥ इंद्रादिक्रतुसंरक्षदेवताः ते० कं ततोपिन्यूनसंख्याभिस्तत्समाभिर्वा॥ शिख्यादिवास्तु वास्तुमंडलदेवताः समिदाज्यपायसयवतिलैः प्रतिद्रव्यं प्रत्येकं अष्टपरैकावरान्यतमसंख्याकाभिः॥ वास्तोष्पतिं तैरेवद्रव्यैः प्र० कं अष्टशतपराष्टावरान्यतमसंख्याभिः॥ पुनः वास्तोष्पातिं चतुर्वीरं चरुणा पुनः वास्तोष्पातिं पंचविंशतिभिः पंचभिर्वा। विल्वफलैस्तद्बीजैर्वा सर्वतोभद्रदेवताः एकैकयाज्याहुत्या॥ पुनरन्नप्रधानं॥ स्थाप्यदेवं। शिवं यात इषुः। शिवतमा द्रापे अंधसस्पते सहस्राणी

त्यनुवाकत्रयगतमंत्रसमसंख्याकाभिः प्रतिपर्यायं अष्टसंख्याकाभिराहु
तिभिः॥ तत्परिवारान् गौरीगणेशनंदीवासुकीन् प्रतिपर्यायं प्रत्येकमष्टाष्ट
संख्याकाभिर्घृताक्ततिलाहुतिभिः हनुमंतं भवादिदेवताः तिलोदनगुडोदनहरि
द्रोदनैः स्त्रिभिर्मीलितद्रव्यैश्च प्रत्येकमकैकयाहुत्या॥ शेषेणेत्यादि आज्यभागांतं
कृत्वा द्रव्यत्यागं कुर्यात्॥ ततो ग्रहवास्तुसर्वतोभद्रमंडलदेवतानां होमं कुर्यात्॥
ततो यजमानः स्नानमंडपं गच्छेत्॥ आचम्य अस्यां सपरिवारशिवमूर्तौ हनुमन्मू
र्तौ च अग्न्युत्तारणपूर्वकं स्नानविधिं नेत्रोन्मीलनादि संस्कारं च करिष्ये॥

तत्रपंचगव्येनभूमिंवेदिकांश्चसंप्रोक्ष्य॥ प्रथमवेद्यांअक्षतैःस्वस्तिकमालिख्य॥ तत्रसप्तधान्यंनिक्षिप्य॥ तत्रभद्रपीठंश्रीपर्ण्यौदुंबरादिकृतंनिधाय तत्रप्रागग्रान्कुशानास्तीर्यप्रतिमांप्राङ्मुखींनिवेशयेत्॥ प्रतिमांदेवतां॥ ततोकलशविधिनाकलशान्संस्थाप्यजलैःपूरयित्वागंधाक्षतपुष्पैःसंपूज्य देवंप्रार्थयेत्॥ स्वागतंदेवदेवेश विश्वरूपनमोस्तुते॥ शुद्धेपित्वदधिष्ठानेशुद्धिंकुर्मःसहस्वतां॥ इतिप्रार्थ्यस्नपयेत्॥ तंत्रमंत्राः॥ ॐ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं॥ अपांरेतांसिजिन्वति॥ इतिमृदकलशेन॥ गायत्र्या

गोमूत्रकलशेन॥२॥ गंधद्वारामिति गोमयेन॥३॥ मानस्तोके ति भस्मना॥४॥
तत्सवितुर्वृणीमहे वयं देवस्य भोजनं॥ श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि॥ इति
गंधोदकेन॥५॥ पंचकलशैः शुद्धोदकेन॥ ॐ नमः शंभवे च मयोभवे च नमः शं
कराय च मयस्कराय च नमः शिवाय च॥ शिवतराय च॥ इति प्रथमेन॥१॥ ॐ हंसः
शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योम
सदब्जा गोजा ऋतजा अद्रिजा ऋतं॥ इति द्वितीयेन॥२॥ ॐ यातेरुद्र शिवा तनूर
घोरापापकाशिनी॥ तयानस्तनुवा शंतमया गिरिशंताभिचाकशीहि॥

इति तृतीयेन ॥ ३ ॥ विष्णोरराटमसि । विष्णोः पृष्ठमसि । विष्णोश्नप्त्रेस्थो । विष्णो
स्युरसि । विष्णोर्ध्रुवमसि । वैष्णव्यमसि । विष्णवे त्वा ॥ इति चतुर्थेन ॥ ४ ॥ ॐ ब्रह्म
जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः ॥ स बुध्निया । उपमा अस्य वि
ष्ठाः सतश्च योनिमसतश्च विवः ॥ इति पंचमेन ॥ ५ ॥ घृतं मिमिक्षेति घृतेनाभ्यज्य
॥ द्रुपदादिविमुंचतु ॥ द्रुपदादिवेन्मुमुचानः ॥ स्विन्नः स्नात्वो मलादिव ॥ पूतं पवित्रेणे
वाज्यं ॥ आपः शुंधंतु मैनसः ॥ उष्णोदकेन संस्नाप्य ॥ गंधादिधूपांतं संपूज्य ॥ परमा
न्नं । निवेद्य वस्त्रैराच्छाद्यं ॥ कुंकुमाक्तेन सूत्रेणावेष्ट्य द्वितीय वेद्यां नीत्वा गंधादिना

शि॰ प्र॰
११७॥

संपूज्य दीपैर्नीराज्य नेत्रोन्मीलनं कुर्यात्॥ तैजसपात्रे घृतयुतं मधु ग्रहीत्वा सु
वर्णशलाकया नेत्रोन्मीलनं कुर्यात्॥ तत्रादौ बलिं प्रदद्यी॥ आचार्यस्तन्मधु सुवर्ण
शलाकया गृहीत्वा स्वयं पार्श्वे स्थित्वा सतूर्यघोषं॥ चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आता जगतस्तस्थुषश्च
॥ इति मंत्रेणैकैकं नेत्रमुन्मीलयेत्॥ तदानकश्चित् पुरतः स्तिष्ठेत्॥ ॐ नमो भगवते
रुद्राय हिरण्यरेतसे पराय परमात्मने विश्वरूपायोमाप्रियाय नम इति संलिख्य॥ तत्र ॥१५॥
मंत्रः॥ ॐ अंजंति त्वामध्वरे देवयंतो वनस्पते मधुना दैव्येन॥ यदूर्ध्वस्तिष्ठाद्द्रविणेह धत्त

त्ताघद्वाक्षयो मातुरस्थाउपस्थे ॥ इति मध्वंजनं ॥ इदं न बाणलिंगे ॥ आचा
र्यी यधेनुं दद्यात् ॥ इदं गोप्राति निधिभूतं द्रव्यं नेत्रोन्मीलनसांगतायेतत्संपूर्णफ
लानाप्तये श्रीसपरिवार शिवहनुमत्प्रीत्यर्थं तुभ्यमहं संप्रददे न मम ॥ शिल्पिने वस्त्रा
दि दद्यात् ॥ इति नेत्रोन्मीलनं ॥ ततो देवस्य हस्ते सितोर्णानिर्मितं सर्वौषधिसम-
न्वितं कार्पासवासितं कौतुकसूत्रं कनिक्रददिति बध्नीयात् ॥ सर्वसत्वमयं शांतंपर
ब्रम्हसनातनं ॥ त्वामेवालंकरिष्यामि त्वं बध्दो भवते नमः ॥ इत्यनेन कंकणं बध्वा ॥
यजमानः आचम्य ॥ अस्यां मूर्तौ देवताधिष्ठानासिध्यर्थं नानाद्रव्यपूरितानेक

शि० प्र०
॥१८॥

कलशैरर्च्याशुद्धिस्नपनं करिष्ये॥ तृतीयवेद्यां देवं नीत्वा वेदीद्वयपक्षे द्वितीय
वेद्यां समग्रस्नानविधिः॥ गंधादिभिः संपूज्य प्रार्थयेत्॥ नमस्तेऽर्च्ये सुरेशानि प्रकृ
ते विश्वकर्मणः॥ प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः॥ त्वयि संपूज्यया मीशं
सदा शिवमनामयं॥ रहिताशेषदोषै स्त्वमृद्धियुक्ता सदा भव॥२॥ सप्रणवव्या
हृत्या गायत्र्या शुद्धोदकस्नानं॥१॥ तत्र मंत्रः॥ या ओषधीः पूर्वा जाता देवेभ्यः
स्त्रियुगं पुरा॥ मनै नु बभ्रूणामहं शतं धामानि सप्त च॥ इति व्रीहीतोयघटेन॥२॥ शुक्र
मसि ज्योतिरसि तेजोऽसि देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य

॥१८॥

रश्मिभिः॥ इति घृतेन॥ ३॥ द्रुपदादिवेतिमाखुरपिष्टेनोद्धर्तनं॥ ४॥ तेनैव
शुध्दांबुघट~~स्मा~~स्नानं॥ या ओषधिरितिसर्वौषधिजलेन॥ ५॥ गायत्र्याद्वादशप-
लगोमुत्रकुंभेन॥ ६॥ गंधद्वारामितिसप्तपलगोमयकुंभेन॥ ७॥ आप्यायस्वेतिषोडश
पलक्षीरकुंभेन॥ ८॥ दधिक्राव्णइतिविंशतिपलदधिकुंभेन॥ ९॥ घृतवतीभुवना
नामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा॥ द्यावापृथिवीवरुणस्यधर्मणाविष्क
भितेअजरेभूरिरेतसा॥ इतिसप्तपलघृतकुंभेन॥ १०॥ देवस्यत्वेतिशुध्दोदककल
शेन॥ ११॥ मधुवाताइतित्रिपलमधुकुंभेन॥ १२॥ आयंगौःपृश्निरक्रमीदसदन्मातरं

पुरः॥ पितरंश्च प्रयन्त्स्वः॥ इति त्रिपत्नशर्कराकुंभेन॥१३॥ हिरंण्यवर्णां हरिणीं

सुवर्णरजतस्रजां॥ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह॥ इति हिरण्यो

दककुंभेन॥१४॥ तरत्समंदी धा०॥ इति कुशोदककुंभेन॥१५॥ द्रुपदादिवेति
यवगोधूमशालिबिल्वमसूरचूर्णेनोद्वर्त्य॥ यातेरुद्रशिवातनूरघो
रापापकाशिनी॥ तयानस्तनुवाशंतमया गिरिशंताभिचाकशीहि॥
इति यक्षकर्दमकुंभेन॥१६॥ यक्षकर्दमस्तु॥ कस्तूरिका द्वौ भागौ द्वौ भागौ ॥११॥
कुंकुमस्य च॥ चंदनस्य त्रयो भागाः शशिनस्त्वेक एव हि॥ इत्युक्तः॥ जयामां

स्यामलकसुगंधेरनुलिप्य॥ मानस्तोके तनये मा न आयुषि मानो गोषु मानो
अश्वेषु रीरिषः॥ वीरान्मानो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम ते॥ इति
उष्णोदककलशेन॥१७॥ गंधद्वारामिति गंधोदकेन॥१८॥ अश्वत्थे वो निष
दनं पर्णे वो वसतिष्कृत॥ गोभाज इत्किलासथ यत्सनवंथ पूरुषं॥ इति
षा
पंचपल्लवकशायोदकेन॥१९॥ याः फलिनीरिति फलकलशोदकेन॥२०॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्॥ सदाधार पृथि
वीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ इति रत्नोदककलशेन॥२१॥

इमंमेगंगेति गंगोदकक०॥२२ समुद्रादूर्मिर्मधुमांउदारदुपांशुनासमंमृतत्वमा-

शि० ग्र० नट्॥ घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः॥इतिगर्तोदकेन-

॥२०॥ ॥२३॥ त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रं॥ह्वयामिशक्रंपुरुहूत

मिंद्रंस्वस्तिनोमघवाधात्विंद्रः॥इतिकदंबपल्लवकलशेन॥२४॥त्वंनोअग्नेवरु-

णस्यविद्वान्देवस्यहेळोवयासिसीष्ठाः॥यजिष्ठोवन्हितमः शोशुचानो ॥२०॥

विश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥इतिशाल्मलीकुंभ०॥२५॥ यमायसोमंसुनुतय-

मायजुहुताहविः॥यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः॥इतिजंबूपल्लवक०॥२६॥

मोषुणः परापरा। निर्ऋतिर्दुर्हणावधीत्॥ पदीष्टतृष्णयासह॥ अशोकपत्र

क०॥२७॥ तत्वायामि प्लक्षपत्रक०॥२८॥ तववायवृतस्पते त्वष्टुर्जामातरद्भु

त॥ अवांस्यावृणीमहे॥ आम्रपत्रक०॥२९॥ सोमोधेनुंसोमो। अर्वंतमा। शुंसोमो

वीरंकर्मण्यंददाति॥ सादन्यं। विदथ्यंसभेयं। पितृश्रवणंयोददाशदस्मै॥ इति

वटपत्रक०॥ ॥ तमीशानंजगतस्तस्थुषस्पतिं। धियं। जिन्वमवसेहूमहेवयं॥ पू

षानोयथावेदसामसद्वृधे रक्षितापायुरदब्धस्वस्तये॥ इति। बिल्वपत्रक०

॥ -॥ नमोंअस्तुसर्पेभ्योयेकेचपृथिवीमनु॥ येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्यो

नमः॥ इतिनागपल्लवकं०॥ ॥ब्रम्हजज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचो
शि० प्र० ॥२१॥ वेनआवः॥ सबुध्न्याउपमाअस्य।विष्ठाः सतश्चयोनिमसतश्चविवः॥
इतिब्रम्हपत्रकं॥ ॥त्र्यंबकंयजामहे० युमामृतात्॥ रुद्राक्षकं०॥ ॥आपोहि
ष्ठेतिशुध्दोदककं०॥ ॥हिरण्यवर्णाः शुचयः पावकायासुजातः कश्यपो
यास्विंद्रः॥ अग्निंयागर्भंदधिरेविरूपास्तानआपः शंस्योनाभवंतु ॥२३॥
यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां॥ मधुश्चुतः
शुचयोयाः पावकास्तानआप०॥ यासांदेवादिविकृण्वंतिभक्षंयाअंतरि

क्षे बहुधा भवंति॥ याःपृथिवीं पयसों दंति शुक्रास्तान आपः॥ शिवेन मा चक्षु
षापश्यतापः शिवया तनुवोपस्पृशत त्वचं मे॥ सर्वाꣳ अग्नीꣳ रप्सुषदो
हुवे वो मयि वर्चो बलमोजो निधत्त॥ पवमानः सुवर्जनः॥ पवित्रेण विच
र्षणिः॥ यः पोता स पुनातु मा॥ पुनंतु मा देवजनाः॥ पुनंतु मनवो धिया॥
पुनंतु विश्व आयवः॥ जातवेदः पवित्र पवित्रवत्॥ पवित्रेण पुनाहि मा॥
शुक्रेण देवदीधत्॥ अग्ने क्रत्वा क्रतूꣳ रनु॥ यत्ते पवित्रमर्चिषि॥
अग्ने विततमंतरा॥ ब्रम्ह तेन पुनीमहे॥ वेश्वदेवी पुनती देव्यागात्॥

यस्यै कृष्णीस्तनुवो वीतपृष्ठाः ॥ तयामदंतः सधमाद्येषु ॥ वयꣳ स्याम
शि॰ प्र॰ पतयो रयीणां ॥ वैश्वानरो रश्मिभिर्मा पुनातु ॥ वातः प्राणेनेषिरोम
॥२२॥ यो भूः ॥ द्यावापृथिवी पयसा पयोभिः ॥ ऋतावरी यज्ञिये मा पुनी
तां ॥ बृहद्भिः सवितस्तृभिः ॥ वर्षिष्ठै देव मन्मभिः ॥ अग्ने दक्षैः पु
नाहि मा ॥ येन देवा अपुनत ॥ येनापो दिव्यं कशः ॥ तेन दिव्येन ब्र
म्हणा ॥ इदं ब्रम्ह पुनीमहे ॥ यः पावमानीरध्येति ॥ ऋषिभिः सं
भृतꣳ रसं ॥ सर्वꣳ स पूतमश्नाति ॥ स्वदितं मातरिश्वना ॥ पावमानी ॥२२॥

र्योऽअध्येति॥ ऋषिभिः संभृतꣳ रसं॥ तस्मै सरस्वती दुहे॥ क्षीरꣳ सर्पिर्मधुदकं॥ पाव
मानीः स्वस्त्ययनीः॥ सुदुघाहि पयस्वतीः॥ ऋषिभिः संभृतोरसः॥ ब्राम्हणेष्व
मृत्तꣳ हित्तं॥ पावमानीर्दिशंतु नः॥ इमं लोकमथोअमुं॥ कामान्समर्धयंतु नः
॥ देवीर्देवैः समाभृताः॥ पावमानीः स्वस्त्ययनीः॥ सुदुघाहि घृतश्चुतः॥ ऋषिभिः
संभृतोरसः॥ ब्राम्हणेष्वमृतꣳ हितं॥ येन देवाः पावित्रेण॥ आत्मानं पुनते
सदा॥ तेन सहस्रधारेण॥ पावमान्यः पुनंतु मा॥ प्राजापत्यं पवित्रं॥ शतोद्या
मꣳ हिरण्मयं॥ तेन ब्रम्हविदो वयं॥ पूतं ब्रम्ह पुनीमहे॥ इंद्रः सुनीती सहमा पुनातु॥

शि॰ प्र॰ सोमः स्वस्त्या वरुणः समीच्या ॥ यमो राजा प्रमृणाभिः पुनातु मा ॥ जातवेदा मो
॥२३॥ र्जयंत्या पुनातु ॥ इत्यंतेन शुध्धोदकक॰ ॥ गंधाद्युपचारैः संपूज्य ॥ तद्विष्णोरिति द्वा
भ्यां स्तुत्वा ॥ एह्येहि मे भगवन् शंभो लोकानुग्रहकारक ॥ यज्ञभागं गृहाणेमं सदाशिव
नमोस्तुते ॥ इति स्नपनाविधिः ॥ ततः उत्तिष्ठ ब्रम्हणस्पते देवयंतस्त्वेमहे ॥ उपप्रयंतु
मरुतः सुदानव इंद्र प्राशूर्भवा सचा ॥ देवमुत्थाप्य वेद्यां पूर्वमुखं देवं शाययेत् ॥ ॥२३॥
वेद्यां कुशानास्तीर्य शय्यायां पुष्पाणि प्रक्षिप्य नमः शंभवे चेति शय्यायां देवं निधाय ॥
तत्र प्रागादिक्रमेण ॥ ॐ भवाय देवाय नमः ॥ भवाय देवमावाहयामि ॥ ॐ शर्वाय

देवायनमः॥ शर्वायदेवमावाह०॥ ॐ ईशानायदेवायनमः॥ ईशानायदेवाय
मा०॥ ॐ पशुपतयेदेवायनमः॥ पशुपतयेदेवमा०॥ ॐ उग्रायदेवायनमः॥ उग्रा
यदेवमा०॥ ॐ रुद्रायदेवायनमः॥ रूद्रायदेवमा०॥ ॐ भीमायदेवायनमः॥ भीमा
यदेवमा०॥ ॐ महतोदेवायनमः॥ महतोदेवमा०॥ ॐ भवस्यदेवस्यपत्न्यैनमः॥
भवस्यदेवस्यपत्नीमा०॥ ॐ शर्वस्यदेवस्यपत्न्यैनमः॥ शर्वस्यदेवस्यपत्नीमा०॥
ॐ ईशानस्यदेवस्यपत्न्यैनमः॥ ईशानस्यदेवस्यपत्नीमा०॥ ॐ पशुपतयेदेवस्यपत्नै
नमः॥ पशुपतयेदेवस्यपत्नीमा०॥ ॐ उग्रस्यदेवस्यपत्न्यैनमः॥ उग्रस्यदेवस्यपत्नी०॥

शि० प्र०
॥२४॥

ॐ रुद्रस्यदेवस्यपत्न्यै नमः॥ रुद्रस्यदेवस्यपत्नीमा०॥ ॐ भीमस्यदेवस्यपत्न्यैनमः
॥ भीमस्यदेवस्यपत्नीमा०॥ ॐ महतोदेवस्यपत्न्यैनमः॥ महतोदेवस्यपत्नीमा०॥
ॐ भवस्यदेवस्यसुतायनमः॥ भवस्यदेवस्यसुतमा०॥ ॐ शर्वस्यदेवस्यसुतायन
मः॥ शर्वस्यदेवस्यसुतमा०॥ ईशानस्यदेवस्यसुतायनमः॥ ईशानस्यदेवस्यसु
तमा०॥ ॐ पशुपतयेदेवस्यसुतायनमः॥ पशुपतयेदेवस्यसुतमा०॥ ॐ उग्रस्यदेव ॥२५॥
स्यसुतायनमः॥ उग्रस्यदेवस्यसुतमा०॥ ॐ रुद्रस्यदेवस्यसुतायनमः॥ रुद्रस्य
देवस्यसुतमा०॥ ॐ भीमस्यदेवस्यसुतायनमः॥ भीमस्यदेवस्यसुतमा०॥ ॐ महतोदे

चस्य सुताय नमः॥ महतो देवस्य सुतमा०॥ ततः पूजयेत्॥ देवं वस्त्रेणाच्छाद्य देवस्य शिरोदेशे भूमौ निद्राकलशं संस्थाप्य तत्र निद्राप्रतिमामावाहयेत्॥ ततो भस्मतिलदर्भैः देवस्य परितः रक्षार्थं प्राकारत्रयं कृत्वा॥ ततः देवे न्यासं कुर्यात्॥ ॐ अं नमः पादयोः॥ ॐ उं नमः हृदये॥ ॐ मं नमः ललाटे॥ इति प्रणवन्यासः॥ ॐ भूः पादयोः॥ ॐ भुवः हृदि॥ ॐ स्वः ललाटे॥ इति व्याहृतिन्यासः॥ अं शिरसि॥ आं मुखे॥ इं दक्षिणनेत्रे॥ ईं वामनेत्रे॥ उं दक्षिणकर्णे॥ ऊं वामकर्णे॥ ऋं दक्षिणनासापुटे॥ ॠं वामनासापुटे॥ लृं दक्षिणकपोले॥ ॡं वामकपोले॥ एं ऊर्ध्वोष्ठे॥ ऐं अधरोष्ठे॥

ओं ऊर्ध्वदंतपंक्तौ ॥ औं अधोदंतपंक्तौ ॥ अं जिह्वायां ॥ अः कंठे ॥ कं दक्षबाहुमूले ॥ खं दक्ष
कूर्परे । गं दक्षमणिबंधे । घं दक्षकरांगुलिमूले ॥ ङं दक्षाकरांगुल्यग्रे ॥ चं वामबाहुमूले ॥
छं वामकूर्परे ॥ जं वाममणिबंधे ॥ झं वामकरांगुलिमूले ॥ ञं वामकरांगुल्यग्रे ॥ टं दक्ष
पादमूले ॥ ठं दक्षजानुनि ॥ डं दक्षपादगुल्फे ॥ ढं दक्षपादांगुलिमूले ॥ णं दक्षपादांगु
ल्यग्रे ॥ तं वामपादमूले ॥ थं वामजानुनि ॥ दं वामपादगुल्फे ॥ धं वामपादांगुलिमूले ॥
नं वामपादांगुल्यग्रे ॥ पं दक्षिणकुक्षौ ॥ फं वामकुक्षौ ॥ बं पृष्ठे ॥ भं नाभौ ॥ मं उदरे ॥ यं हृ
दि ॥ रं आधारे ॥ लं मणिपूरे ॥ वं स्कंधयोः ॥ शं हृदादिदक्षाकरे ॥ षं हृदादिवामकरे ॥

संहृदादिदक्षपादे ॥ हंहृदादिवामपादे ॥ ळंक्षंसर्वंगे ॥ इतिमातृकान्यासः ॥
ॐहृदयायनमः ॥ संशिरसेस्वाहा ॥ दंशिखायैवषट् ॥ शिंकवचायहुं ॥ वांनेत्रत्रया
यवौषट् ॥ यंअस्त्रायफट् ॥ ततः कुंडसमीपेसंपातधारणार्थंएकंकलशंविधिनासं
स्थाप्य ॥ पर्यायहोमंकुर्यात् ॥ अन्वाधानोक्तक्रमेणप्रधानाज्याहुतीर्हुत्वा ॥ सर्वो
वैरुद्रस्तस्मैरुद्रायनमोअस्तु ॥ पुरुषोवैरुद्रसन्महोनमोनमः ॥ इतिदेवस्यपादौ
स्पृशेत् ॥ एवंपुनर्हुत्वा ॥ ॐकद्रुद्रायप्रचेतसेमीदुष्टमायतव्यसे ॥ वोचेमशंतमं
हृदे ॥ इतिमध्यंस्पृशेत् ॥ एवंपुनर्हुत्वा ॥ नमोहिरण्यबाहवेहिरण्यवर्णायहिरण्यरू

पाय हिरणपतयें।बिकापतय उमापतयेपशुपतयेनमोनमः॥इति शिरःस्पृशेत्॥
पुनर्हुत्वासंपूर्णेनरुद्रेणसर्वांगंस्पृशेत्॥प्रतिस्पर्शंसंपातकलशोदकेनाभिषिंचेत्॥
पंचोपचारपूजांचप्रासादसंस्कारंकृत्वा॥ततः उदुत्यंजातवेदसंदेवंवहंतिकेत
वः॥दृशे विश्वायसूर्यं॥इति देवमुत्थाप्य॥सद्योजातंप्रपद्यामिसद्योजातायवैनमो
नमः॥भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः॥१॥वामदेवायनमोज्येष्ठाय
नमः श्रेष्ठायनमोरुद्रायनमः कालायनमःकलविकरणायनमोबलविकरणायन
मोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः॥२॥

अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेअस्तुरु
द्ररूपेभ्यः ॥ ३ ॥ तत्पुरुषायविद्महे महादेवायधीमहि ॥ तन्नोरुद्रः प्रचोदयात् ॥
४ ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानांब्रम्हाधिपतिर्ब्रम्हणोधिपतिर्ब्रम्हा
शिवोमेअस्तुसदाशिवों ॥ ५ ॥ इतिपंचमंत्रैः देवालयंप्रविश्य ॥ गर्तमध्येपंचरत्नानि
निक्षिपेत् ॥ ब्रम्हशिलाकूर्मीशिलास्थापयित्वा ॥ नमस्तेरुद्रमन्यवउतोतइषवे
वेनमः ॥ नमस्तेअस्तुधन्वनेबाहुभ्यामुततेनमः ॥ इतिदेवंस्थापयित्वा ॥ ॐ
ध्रुवाद्यौर्ध्रुवापृथिवीध्रुवासः पर्वताइमे ॥ ध्रुवंविश्वमिदंजगद्ध्रुवोराजाविशामयं ॥

शि० प्र०
५८॥
॥२७॥

ध्रुवंतेराजावरुणोध्रुवंदेवोबृहस्पतिः॥ध्रुवंतइंद्रश्चाग्निश्चराष्ट्रंधारयतांध्रुवं॥ध्रुवंध्रु
वेणहविषाभिसोमंमृशामसि॥अथोतइंद्रःकेवलीर्विशोबलिहृतस्करत्॥इहैवैधि
माप्च्योष्ठाःपर्वतइवाविचाचालिः॥इंद्रइवेहध्रुवास्तिष्ठेहराष्ट्रमुधारय॥इममिंद्रोअदी
धरध्रुवंध्रुवेणहविषा॥तस्मैसोमोअधिब्रवत्तस्माउब्रम्हणस्पतिः॥५॥इतिस्थिरीकृत्य
देवंस्पृष्ट्वा॥ॐभूः पुरुषमावाहयामि॥ॐभुवः पुरुषमा०॥ॐस्वः पुरु०॥ॐभूर्भुवः स्वः ॥२७॥
पुरु०॥इहैवैधीतिमंत्राजपित्वा॥प्रणवेनकृतांगन्यासः॥प्राणप्रतिष्ठांकुर्यात्॥ ॥२८॥
अस्यैप्राणाप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच॥अस्यैदेवस्यमर्चायैमामहेतिचकश्चन॥

देवकर्णे गायत्रीं जपेत्॥ तत्पुरूषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्रः प्रचोदयात्
॥महादेवस्य॥ गणांबिकायै विद्महे कामकालिन्यै धीमहि॥ तन्नो गौरी प्रचोदयात्॥२॥
इति गौर्याः॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि॥ तन्नो दंतिः प्रचोदयात्॥३॥ इति ग
णपतेः॥ तत्पुरुषाय विद्महे सहस्रफणाय धीमहि॥ तन्नः शेषः प्रचोदयात्॥४॥ इति नागस्य॥
तीक्ष्णशृंगाय विद्महे वेदपादाय धीमहि॥ तन्नो वृषः प्रचोदयात्॥५॥ तत्पुरुषाय विद्म
हे वायुपुत्राय धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥६॥ स्वागतं देवदेवेश [illegible] मद्भाग्या
त्त्वमिहागतः॥ सान्निध्यं सर्वदा देव स्वार्च्चायां परिकल्पय॥ इति प्रार्थ्य॥ रत्नोवुफलशो

शि० प्र०

॥२५॥

दकेनाभिषिंचेत्॥ ततोदेवताध्यानं॥ आवाहनं॥ आसनं॥ विष्णुक्रांताश्यामाक
पद्मपत्रयुतकलशोदकेनपाद्यं॥ क्षीरकुशाग्रयवातिलदूर्वायुतफलशोदकेनार्घ्यं॥
एलालवंगकर्पूरकंकोलमिश्रोदकेनाचमनं॥ पंचामृतमंत्रैः पंचामृतस्नानं॥ पंचोप
चारपूजाच अभिषेकः॥ गंधादिपुष्पंजल्यंतं पूजयेत्॥ इमाआपः शिवाः शिवतमा
पूताः पूततमा मेध्यामेध्यतमा अमृता अमृतरसाः पाद्यार्थास्ताजुषन्तां प्रतिगृण्हातु
भगवान्महादेवः॥ स्नानपर्यंतं अस्य मंत्रस्या वृत्तिः॥ इमेगंधाः शुभादिव्याः सर्वगंधै
रलंकृताः॥ पूताब्रम्हपवित्रेण पूताः सूर्यस्यरश्मिभिः॥ इतिगंधदानेमंत्रः॥ इमेमा

२८॥

॥२५॥

ल्या:शुभादिव्या:सर्वमाल्यैरलंकृता:॥धूताब्रम्हपवित्रेणपूता:सूर्यस्यरश्मिभि:॥
इतिपुष्पदानेमंत्र:॥ नमो अस्तुनीलग्रीवायसहस्राक्षायमीढुषे॥ अथोयेअस्य
सत्वानोहंतेभ्योकरंनम:॥इतिप्रतिसरंविसृजस्य॥प्रार्थयेत्॥त्वामेकमाद्यंपुरूषंपुराणं
रुद्रंशिवं।विश्वसृजंयजामहे॥त्वमेवयज्ञोविहितोविधेयस्त्वमात्मनात्मन्प्रतिगृ
ण्हीष्वभूमन्॥ ॐ विश्वभुजेनम:॥ ॐ सर्वभुजेन०॥ अंतरात्मने०॥ ॐ परमा
त्मने०॥इतिनत्वा॥यावच्चंद्रश्चावनीसूर्योस्तिष्ठंत्यप्रतिघातिन:॥ तावत्त्वयात्रदेवेश
स्थेयंभक्तानुकंपया॥१॥कर्तुर्नाम्नाअमुकेश्वरइतिनामकृत्वा॥गंधादिभि:संपूज्य

साष्टांगंप्रणमेत्॥ ततः कुंडसमीपे गत्वा॥ तिलोदनंजुहुयात्॥ ॐभवायदेवा
यनमः स्वाहा॥१॥ ॐशर्वायदेवायनमः स्वा०॥२॥ ॐईशानायदेवायनमः स्वा०॥३॥
ॐपशुपतयेदेवायनमः स्वा०॥४॥ ॐउग्रायदेवायनमः स्वा०॥५॥ ॐरुद्रायदेवायनमःस्वा०॥६॥ ॐ
भीमायदेवायनमः स्वा०॥७॥ ॐमहतोदेवायन०॥८॥ ततः गुडोदनंजुहुयात्॥ ॐभवस्यदेव
स्यपत्न्यैनमस्वा०॥१॥ ॐशर्वस्यदेवस्यपत्न्यैन०॥२॥ ॐईशानस्यदेवस्यपत्न्यैन०॥३॥ ॐ
पशुपतेर्देवस्यपत्न्यैन०॥४॥ ॐउग्रस्यदेवस्यपत्न्यैन०॥५॥ ॐरुद्रस्यदेवस्यपत्न्यैन०॥६॥ ॐ
भीमस्यदेवस्यपत्न्यैन०॥७॥ ॐमहतोदेवस्यपत्न्यैन०॥८॥ ततः हरिद्रोदनंहुत्वा॥ ॐभवस्य

देवस्यसुतायनमस्वाहा॥१॥ॐशर्वस्यदेवस्यसुताय०॥२॥ॐईशानस्यदेवस्यसुताय०
॥३॥ॐपशुपतेर्देवस्यसुताय०॥४॥ॐउग्रस्यदेवस्यसुताय०॥५॥ॐरुद्रस्यदेवस्यसुताय०॥६॥
ॐभीमस्यदेवस्यसुताय०॥७॥ॐमहतोदेवस्यसुताय०॥८॥त्रीणिहविषिएकीकृत्यप्रति-
मंत्रमेकैकाहुतिंजुहुयात्॥ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं॥उर्वारुकमिवबं
धनान्मृत्योर्मुक्षीयमामृतात्स्वाहा॥१॥ॐमानोमहांतमुतमानोअर्भकंमानउक्षंत
मुतमानउक्षितं॥मानोवधीःपितरंमोतमातरंप्रियामानस्तनुवोरुद्ररीरिषःस्वाहा॥
॥२॥ॐमानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः॥वीरान्मानोरुद्र

भामितोवेधीहिविषंतोनमसाविधेमतेस्वाहा॥३॥आरात्तेगोघ्नउतपूरुषघ्नेक्षयद्वी
रायसुम्नमस्मेतेअस्तु॥रक्षाचनोअधिचदेवब्रूह्यधाचनःशर्मयच्छद्विबर्हाःस्वाहा॥
४॥विकिरिद्रविलोहितनमस्तेअस्तुभगवः॥यास्तेसहस्रंहेतयोन्यमस्मन्निवपंतुताःस्वाहा
॥५॥सहस्राणिसहस्रधाबाहुवोस्तवहेतयः॥तासामीशानोभगवःपराचीनामुखा
कृधिस्वाहा॥६॥ततोद्वादशनामभिस्तस्यैचहोमः॥ॐशिवायनमःस्वाहा॥१॥ॐशंकराय
नमःस्वाहा॥२॥ॐसहमानायनमःस्वाहा॥३॥ॐशितिकंठायनमःस्वाहा॥४॥ॐकपर्दिने
नमःस्वाहा॥५॥ॐताम्रायनमःस्वाहा॥६॥ॐअरुणायनमःस्वाहा॥७॥ॐअपगुरमाणाय

नम स्वा०॥ ८॥ ॐ हिरण्यबाहवे नमः स्वा०॥ ९॥ ॐ सास्पिंजराय न०॥ १०॥ ॐ बभ्लुशाय न०॥ ११॥ ॐ हिरण्याय न०॥ १२॥ इति हुत्वा॥ स्विष्टकृतादिहोमशेषं समाप्य बलिदानं पूर्णाहुतिं कृत्वा॥ कृतस्य सपरिवारशिवहनुमत्प्रतिष्ठाकर्मणः सांगतायै तत्संपूर्णफलावाप्तये आचार्यादिऋत्विग्भ्यः श्रेयोग्रहणं करिष्ये॥ आचार्यः यजमानकुले दीर्घमायुरस्तु शिवा आपः संतु सोमनस्यमस्तु अक्षतं चारिष्टं चास्तु अक्षताः पातु आयुष्यमस्तु पुष्पाणि पांतु सोश्रियमस्तु॥ भवान्नियुक्तेन मया भवत्सकलमनोरथसिध्यर्थं अस्मिन् सपरिवारशिवहनुमत्प्रतिष्ठाकर्मणि मे। भिर्ब्राह्मणैः सह यत्कृतं आचार्यत्वं ब्रह्मत्वं सदस्यत्वं उपद्रष्टुत्वं गणपतित्वं

जपकर्तृत्वंहोमकर्तृत्वंचतदुत्पन्नंयच्छ्रेयस्तत्तुभ्यमहंसंप्रददेनमम।।प्रतिगृण्हा
तुभवान्प्रतिगृण्हामीतियजमानः।।तदंगत्वेनऋत्विक्पूजनंकरिष्ये।।तेभ्यो
दक्षिणादानं।।कृतस्यसपरिवारशिवह्नुमत्प्रतिष्ठाकर्मणःसांगतायेतत्संपूर्णफला
वाप्तयेश्री।शिवादिदेवताप्रीत्यर्थंआचार्यायद्रव्यद्वारागोदानंकरिष्ये।।ब्राम्हणंसंपूज्य
।।गवामंगेषुतिष्ठंतिभुवनानिचतुदश।।यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच
।।१।।इदंगोप्रतिनिधिभूतंयथाशक्तिद्रव्यंपूर्वोक्तफलसिध्दयेअमुकशर्मणेतुभ्यम
हंसंप्रददेनमम।।यज्ञसाधनभूताया।विश्वस्याघौघनाशिनी।।विश्वरूपधरोदेवः

प्रीयतामनयागवा ॥१॥ मयाकृतस्य देशकालाद्यनुसारतः सपरिवारशिवहनुमत्प्रतिष्ठाकर्मणः सांगतायै श्रीशिवादिदेवताप्रीत्यर्थं यथाशक्ति ब्राह्मणान् सुवासिनींश्च यथोपपन्नेनान्नेन भोजयिष्ये ॥ नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां दातुमहमुत्सृज्ये ॥ यस्य स्मृत्या० तं ॥ अनेन मयाकृतेन देशकालाद्यनुसारतः सपरिवारशिवहनुमत्प्रतिष्ठाकर्मणा श्रीसपरिवारशिवहनुमांश्च प्रीयतां ॥ इदं प्रधानपीठं व्रतपीठं च सदक्षिणाकं आचार्याय तुभ्यमहं संप्रददे न मम ॥ पुस्तकं पूजयेत् ॥ कलशेभ्यः उदकं गृहीत्वा ॥ यजमानाभिषेकं कुर्यात् ॥

ब्राह्मणेभ्यः आशिषंगृहीत्वा॥ कुटुम्बतोभुंजीत॥ इति॥ शिवप्रतिष्ठाविधिः॥
देवतानाममंत्रोच्चारसमाप्त॥ [illegible]॥ [illegible]॥
देवतायाःस्वकंनाममूलमंत्रःप्रकीर्तितः॥३॥इदंव्रतराजोक्तंभवेत्॥
श्रीदत्तात्रेयार्पणमस्तु॥इति॥शिवहनुमत्प्रतिष्ठासमाप्तः॥ छ॥ छ॥ छ॥
शके१८८६ क्रोधीनामसंवत्सरे आषाढमासेशुक्लपक्षे१०दशम्यांतिथौ
भानुवासरेतद्दिनेइदंपुस्तकलेखनंसमाप्तं॥

॥श्रीगणेशायनमः॥ अथपर्यायहोममंत्रप्रारंभः॥ ॐयातइषुः।शिवतेमाशिवंबभू
वतेधनुः॥ शिवाशरव्यायातवतयानोरुद्रमृडयस्वाहा॥१॥ ॐयातेरुद्रशिवातनूर
घोरापापकाशिनि॥ तयानस्तनुवाशंतमयागिरिशंताभिचाकशीःस्वाहा॥२॥ ॐयामि
षुंगिरिशंतहस्तेबिभर्ष्यस्तवे॥ शिवांगिरित्रतांकुरुमाहिंसीःपुरुषंजगत्स्वाहा॥३॥
ॐशिवेनवचसात्वागिरिशाच्छावदामसि॥ यथानःसर्वमिज्जगदयक्ष्मंसुमना
असत्स्वाहा॥४॥ ॐअध्यवोचदधिवक्ताप्रथमोदैव्योभिषक्॥ अहींश्चसर्वांजंभयन्
सर्वाश्चयातुधान्यःस्वाहा॥५॥ ॐअसौयस्ताम्रोऽअरुणउतबभ्रुःसुमंगलः॥ येचेमां

सो
रुद्रा अभितो दिक्षुश्रिताः सहस्रशो वैषाꣳ हेडईमहे स्वाहा ॥ ६ ॥ ॐ असौयो

शि॰ प्र॰ ॥ ३२ ॥

वसर्पति नीलग्रीवो विलोहितः ॥ उतैनं गोपा अदृशंनदृशंनुदहार्यः ॥ उतैनंवि
श्वाभूतानि स दृष्टो मृडयाति नः स्वाहा ॥ ७ ॥ ॐ नमो अस्तु नीलग्रीवाय
सहस्राक्षाय मीढुषे ॥ अथो ये अस्य सत्वानो हं तेभ्यो करं नमः स्वाहा ॥ ८ ॥ ॐ
प्रमुंच धन्वनस्त्वमुभयोरार्त्न्योर्ज्यां ॥ याश्चते हस्त इषवः परा ता भगवो ॥ ३२ ॥
यथा स्वाहा ॥ ९ ॥ ॐ अवतस्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे ॥ निशीर्य शल्यानां
वप
मुखा शिवो नः सुमना भव स्वाहा ॥ १० ॥ ॐ विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ

उत ॥ अनेशंनस्य्येषव आभुरस्य निषंगथिः स्वाहा ॥११॥ ॐ यातेहेतिर्मीढुष्ट
म हस्ते बभूव ते धनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज स्वाहा ॥१२॥
ॐ नमस्ते अस्त्वायुधायानातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्यां
तव धन्वने स्वाहा ॥१३॥ ॐ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ॥ अ
थो य इषुधिस्तवारे अस्मन्निधेहि तं स्वाहा ॥१४॥ ॐ द्रापे अंधसस्पते दरि
द्रं नीललोहित ॥ एषां पुरुषाणामेषां पशूनां मा भेर्मारो मो एषां किंचना
मंमत् स्वाहा ॥१५॥ ॐ या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी ॥ शिवा रुद्रस्य भे

षजीतयानोमृडजीवसेस्वाहा॥१६॥ॐइमाꣳरुद्रायतवसेकपर्दिनेक्षयद्वी
शि॰ प्र॰ रायप्रभरामहेमातिं॥यथानःशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्नना
॥३[illegible]॥ तुरꣳस्वाहा॥१७॥ॐमृडानोरुद्रोतनोमयस्कृधिक्षयद्वीरायनमसाविधेमते॥
३७ यच्छंच्चयोश्चमनुरायजेपितातदश्यामतवरुद्रप्रणीतौस्वाहा॥१८॥ॐमानोम ३८
हान्तमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं॥मानोवधीःपितरंमोतमातरं ॥३८॥
प्रियामानस्तनुवोरुद्ररीरिषःस्वाहा॥१९॥ॐमानस्तोकेतनयेमानआयुषिमानो
गोषुमानोअश्वेषुरीरिषः॥वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसाविधे

मतेस्वाहा॥२०॥ ॐ आरात्तेगोघ्नउतपूरुषघ्नेक्षयद्वीरायसुम्नमस्मेतेअ

स्तु॥ रक्षाचनोअधिचदेवब्रूह्यधाचनःशर्मयच्छद्विबर्हाः स्वाहा॥२१॥ ॐ

स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं॥ मृडाजरित्रेरुद्रस्तवानोअ

न्यंतेअस्मन्निवपंतुसेनाःस्वाहा॥२२॥ ॐ परिणोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्य

दुर्मतिरघायोः॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृडय

स्वाहा॥२३॥ ॐ मीढुष्टमशिवतमशिवोनःसुमनाभव॥ परमेवृक्षआयुधंनिधा

यकृत्तिंवसानआचरपिनाकंबिभ्रदागहिस्वाहा॥२४॥ ॐ विकिरिद्रविलोहितनमस्ते

शि० प्र० अस्तुभगवः॥यास्तेसहस्त्रꣳहेतयोन्यमस्मन्निवपंतुताःस्वाहा॥२५॥ॐसहस्त्रा
णिसहस्त्रधाबाहुवोस्तवहेतयेः॥तासामीशानोभगवःपराचीनामुखाकृधिस्वाहा॥२६॥
॥३४॥ ॐसहस्त्राणिसहस्त्रधाबाहुवोस्तवशो॥येरुद्राअधिभूम्यां॥तेषाꣳसहस्त्रयोजनेवधन्वा
॥३५॥ नितन्मसिस्वाहा॥२७॥ॐअस्मिन्महत्यर्णवेंतरिक्षेभवाअधि॥तेषाꣳसहस्त्रयोजनेव
धन्वानितन्मसिस्वाहा॥२८॥ॐनीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः॥तेषाꣳ ॥३५॥
सहस्त्रयोजनेवधन्वानितन्मसिस्वाहा॥२९॥ॐनीलग्रीवाःशितिकंठादिवꣳरुद्रा ॥३४॥
उपश्रिताः॥तेषाꣳसहस्त्रयोजनेवधन्वानितन्मसिस्वाहा॥३०॥ॐयेवृक्षेषुसस्पिं

जरानीलग्रीवाविलोहिताः ॥ तेषाꣳसह० सिस्वाहा ॥ ३१ ॥ ॐ येभुतानामधिपतयो
विशिखासः कपर्दिनः ॥ तेषाꣳस० सिस्वाहा ॥ ३२ ॥ ॐ येअन्नेषुविविध्यंतिपात्रेषुपिबतो
जनान् ॥ तेषाꣳसह० सिस्वाहा ॥ ३३ ॥ ॐ येपथांपथिरक्षयऐलवृदायव्युर्धः ॥ तेषाꣳस०
सिस्वाहा ॥ ३४ ॥ ॐ येतीर्थानिप्रचरंतिसृकावंतोनिषंगिणः ॥ तेषाꣳस० सिस्वाहा ॥ ३५ ॥
ॐ यएतावंतश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे ॥ तेषाꣳस० सिस्वाहा ॥ ३६ ॥ ॐ
नमोरुद्रेभ्योयेपृथिव्यांयेषामन्नमिषवस्तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीची
र्दशोदीचीर्दशोर्ध्वास्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेद

हि० प्र०
॥ ७५ ॥
३९

धामिस्वाहा ॥ ३७ ॥ ॐ नमो रुद्रेभ्यो येंतारिक्षेयेषांवात इषवस्तेभ्यो दशप्राचीर्दश दक्षिणा०
वोअंभेद धामि स्वाहा ॥ ३८ ॥ ॐ नमो रुद्रेभ्योये दिवियेषां वर्षमिषवस्तेभ्यो दशप्राची० वो
जंभेद धामि स्वाहा ॥ ३९ ॥ ॐ नमो रुद्रेभ्योये पृथिव्यां येंतारिक्षे ये दिवियेषामन्नं वातो
वर्षामिषवस्तभ्यो दशप्राचीर्द० मि स्वाहा ॥ ४० ॥ ॐ तामग्निवर्णांतपसा ज्वलंतीं वैरो
चनीं कर्मफलेषुजुष्टां ॥ दुर्गां देवीं शरणमहं प्रपद्ये सुतरांसि तरसे नमः सुतरसितरसे नमः ३९
स्वाहा ॥ १ ॥ ॐ गौरीर्मिमाय सलिलानितक्षत्येकपदी द्विपदी सा चतुष्पदी ॥ अष्टापदी ॥ ३५म
नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्स्वाहा ॥ २ ॥ ॐ गणानां त्वा गणपतिं ह

वामते कविं कवीनामुपमश्रवस्तमं ।। ज्येष्ठराजं ब्रम्हणां ब्रम्हणस्पत आनः श्रण्वन्नूतिभिः सीदसादनंस्वाहा ।। ३ ।। ॐ आयंगौः पृश्निरक्रमीदसदन्मातरं पुरः ।। पितरंच प्रयन्त्स्वाः स्वाहा ।। ४ ।। ॐ ऋषभंमासमानानां सपत्नानां विषासहिं ।। हंतारं शत्रूणां कृधि विराजं गोपतिं गवां स्वाहा ।। ५ ।। ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।। यः शंसते स्तुवते धायि पज्र इंद्र ज्येष्ठा अस्माँ अवंतु देवाः स्वाहा ।। ६ ।। इति हुत्वा देवस्य पादौ स्पृशेत् सर्वत्र ।। मौंजिबंधनमंत्रः ।। कौपीनार्थं त्रिवृतं कार्पाससूत्रं कटावाबध्य ।। कौपीनं परिधाप्य ।। द्वितीयजन्मन्युल्बप्रतिनिधिभूतमहतं शुक्लं वासः समंत्रं प

रिधाप्य॥ अन्येन काषायवाससात्तथैवप्रावारयेत्॥ तत्र मंत्रः॥ युवंवस्त्राणीत्यस्य
शि॰ प्र॰ ।२६८॥ औचथ्यो दीर्घतमा मित्रावरुणौ त्रिष्टुप् वासोधारणे विनियोगः॥ ॐ युवंवस्त्रा॰णित्यृक्
३७ ॥प्रावरणार्थं कृष्णाजिनं वा॥ मित्रस्यचक्षुरित्यस्य वामदेवो जिनं त्रिष्टुप्॥ आजिनधार
णे विनियोगः॥ ॐ मित्रस्यचक्षुर्धरुणं बलीयस्तेजो यशस्वी स्थविरं समिध्दं॥ अनाह
नस्यं वसनं जरिष्णु परीदं वाज्यजिनं दधेहं॥ ततो द्विजत्वचिन्हार्थं यज्ञोपवीतंपरिदध्यात् ३७
॥यज्ञोपवीतमभिमंत्र्य॥ श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थं यज्ञोपवीतधारणे विनियोगः॥ ॥२६८
ॐ यज्ञोपवीतं परमं॰॥ इतिमंत्रं वाचयित्वा दक्षिणं बाहुमुध्दार्य उपवीतं धारयित्वा॥

तत्रा विधिवदाचम्य ॥ तस्य रक्षार्थं शुध्यर्थं च मेखलामाबध्नीयात् ॥ इयं दुरुक्तादिति
द्वयोर्वामदेवो मेखला त्रिष्टुप् ॥ मेखलाबंधने विनियोगः ॥ ॐ इयं दुरुक्तात्परिबाधमाना
शर्म वरूथं पुनती न आगात् ॥ प्राणापानाभ्यां बलमाभरंती प्रिया देवानां सुभगा मेख
लेयं ॥ ऋतस्य गोप्त्री तपसः परस्पी घ्नती रक्षः सहमाना अरातीः ॥ सा नः समंतमनुप
रेहि भद्रया भर्तारस्ते मेखले मा रिषाम ॥ इति वाचयित्वा ॥ मेखलां त्रिरावृत्या नाभिप्रदे
शे ग्रंथित्रयं कुर्यात् ॥ पालाशदंडं दद्यात् ॥ स्वस्ति न इत्यस्य स्वस्त्यात्रेयो विश्वेदेवा त्रिष्टुप्
दंडदाने वि० ॥ ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ॥ स्वस्ति पू

षा।असुरोदधातुनः स्व।स्तिद्यावापृथिवीसुचेतुना॥ तद्गृहणेमंत्रः॥ अदांतंदम
यित्वामांमार्गेसंस्थापयंस्स्वयं॥ दंडः करेस्थितोयस्मात् तस्माद्रक्षयतोभयं॥
इतिवाचयेत्॥ अंतःपटंधृत्वामंगलाष्टकानिपठित्वा ऋक्ष्यवेत्यादिखंडानिपठेत्
भिक्षांदद्यात्॥ इतिश्री सपरिवाराशिवहनुमत्प्रतिष्ठामंत्रः॥ ६५॥ श्रीदत्तात्रेयार्पणमस्तु॥

श्री

संकल्प. पंचायतन ~~[illegible]~~

अद्यपूर्वोच्चारितेत्यादि. श्री सपरिवार श्रीशिवा
द्हनुमन्मूर्तिप्रतिष्ठां करिष्ये.
एकतंत्रेण करिष्ये.

पुण्याहवाचन.

श्री सपरिवार श्री शिव पंचायतन गणेश हनुमन्मूर्ति
प्रतिष्ठाकर्मणः पुण्याहं : ___

अन्वाधान.

अग्न्यादिनवग्रहान् अधिप्रत्यधिदेवा
गणपत्यादिक्रतुसंरक्षक इंद्रादि अष्टौ लो-
कदेवान्. वास्तुदेवतां सर्वतोभद्रदेव
पुनः प्रधानं ~~[illegible]~~ :
श्री सपरिवारं शिवं.
पुनः प्रधानं
गणपतिं. हनुमन्तं

```
[OrderDescription]
,CREATED=07.08.20 15:24
,TRANSFERRED=2020/08/07 at 15:33:19
,PAGES=80
,TYPE=STD
,NAME=S0003444
,Book Name=M-2497-HANUMAT SANHITA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
```

```
FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
```

```
FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
```

```
FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
```

```
FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,
```